## || श्री स्वामी सामर्थ ||

---

## ||वंश लाभाख्य कवच||

---

|| नारद उवाच ||

भगवन सर्वधर्मज्ञ पार्वती प्राण-वल्लभ ।
वंश लाभाख्य कवचं कृपया में प्रकाशय ।।१।।

।।ईश्वर उवाच ।।

वंश लाभाख्य कवचं दुर्लभं भुवनत्रये ।
यस्य प्रसादात कमला लेभे तनयमुत्तमम ।।२।।

कामदेवमपर्णा च विनायक षडाननौ ।
जयन्तभिंद्रवनिता देवपत्न्यः सुतानपि ।।३।।

।। विनियोगः।।

अस्य वंश लाभाख्य कवचस्य भैरव ऋषि अनुष्टुप छन्दः
श्रीपार्वती देवता जीवित तनय प्राप्तये विनियोगः ।।४।।

पार्वती में शिरः पातु वक्त्रं पातु महेश्वरी ।
भवानी नयने पातु भ्रुवौ शङ्करसुंदरी ।।५।।

मध्येपातु महेशानी नितम्बं सुरवन्दिता ।
उरु गौरी सदा पातु कौषिकी जानुयुग्मकम् ।।६।।

बाहू द्वौ सुमुखी पातु पाणियुग्मं सुभाविनी ।

पादौ ब्रह्ममयी पातु श्रवणे भुवनेश्वरी ।। ७।।

नासिके ललिता पातु कण्ठं त्रिपुरसुन्दरी ।
रुद्राणी हृदयँ पातु स्तनद्वन्द्वं महेश्वरी ।।८।।

आपादमस्तकं पातु सर्वाङ्गं सर्वमङ्गला ।
इति ते कथितं विप्र कवचं देवपूजितम् ।। ९।।

पठित्वा धारयित्वा च अक्षयं तनयं लभेत ।
ध्यानमस्याः प्रवक्ष्यामि यथा ध्यात्वा पठेन्नरः ।। १०।।

सहस्त्रादित्य सङ्काशां सर्वाभरण भूषिताम् ।
त्रिनेत्रां पाणिविन्यस्त पाशांकुश वरा-भयाम् ।। ११।।

।।इति श्री भैरव तन्त्रे शिव नारद
सम्वादे वंश लाभाख्य कवचं सम्पूर्णं ।।

---

।। श्रीगुरुदत्तात्रेयार्पणमस्तु ।।
|| श्री स्वामी समर्थार्पण मस्तु||

---